# संस्कृत-वार्ता:

**दिनाङ्क :- 27.06.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ता:

- राष्ट्रपति: द्रौपदी मुर्मू: संसद: उभे सदने संयुक्तोपवेशने सम्बोधितवती। सा अवदत् – परीक्षापत्रस्रवण घटनाम् अन्वेषयितुम् अपराधिनः दण्डयितुम् च सर्वकारः प्रतिबद्धः अस्ति।
- राष्ट्रपतिः द्रौपदी मुर्मूः प्रोक्तवती यत् आगामि-आय-व्यय-पत्रकं सर्वकारस्य भाविनी: नीती: लक्ष्येषु च आधारितं भविष्यति।
- अमरीकी-कांग्रेस-दलस्य निम्न सदनेन पाकिस्ताने जायमान: सामान्य-निर्वाचनस्य स्वतन्त्रान्वेषणस्य कृते प्रस्ताव: पारित:।
- ऋतु-विज्ञान-विभागेन अद्य मध्यमा-वृष्ट्या: पूर्वानुमानं कृतम्।
- **अपि च**
- आई.सी.सी. विश्व-चषक-प्रतिस्पर्धायां द्वितीय-उपान्त्यचक्रे भारतदलं इंग्लैण्ड-दलेन सह स्पर्धिष्यते।

- **अथ वार्ताः विस्तरेण**

### राष्ट्रपति: द्रौपदी मुर्मू

राष्ट्रपति: द्रौपदी मुर्मू: संसद: उभे सदने संयुक्तोपवेशने सम्बोधितवती। सा अवदत् – अद्यतन परीक्षापत्रस्रवणस्य घटनाम् अन्वेषयितुम् अपराधिनः दण्डयितुम् च सर्वकारः प्रतिबद्धः अस्ति। राष्ट्रपति: द्रौपदी मुर्मू: उक्तवती यत् परीक्षापत्रस्रवणस्य निष्पक्षतया परीक्षणाय दोषिभ्यश्च कठोर: दण्डः स्यात्। एतदर्थं प्रशासनं प्रतिबद्धम् अस्ति। राष्ट्रपतिः अवदत् यत् प्रतियोगि-परीक्षा भवेत् अथवा सर्वकारीयनियुक्तिप्रक्रिया स्यात् सर्वेषु विषयेषु पूर्णपारदर्शितायाः, सत्यनिष्ठतायाः आवश्यकता वर्तते। मम प्रशासनम् एतादृशानां चिन्ताप्रदानां परीक्षा- पत्राणाम् प्राक्प्रसारण- घटनानां निष्पक्षतया अन्वेषणं कृत्वा अपराधिभ्यः कठोरं दण्डं दातुं प्रतिबद्धम् अस्ति। परीक्षासु अनियमिततानां विरोधे संसदा अपि कठोरम् संविधानम् निर्मितम्। राष्ट्रपति: मुर्मू: उक्तवती यत् जम्मू-कश्मीरस्य जनाः सद्यः सम्पन्ने लोकसभानिर्वाचने मतदानानि दत्वा देशस्य शत्रूभ्य: समुचितं उत्तरं दत्तवन्तः। कश्मीर उपत्यकायां मतदानेन बहुदशकानां मतदानस्य अभिलेखाः भग्नाः जाताः। संशोधन- प्रदर्शन-परिवर्तनानाम् सङ्कल्पेन भारतस्य द्रुततरा वर्धमाना अर्थव्यवस्था कृता इति उक्तवती। राष्ट्रपतिः द्रौपदी मुर्मूः।

राष्ट्रपतिः द्रौपदी मुर्मूः उक्तवती यत् संशोधनस्य, प्रदर्शनस्य, परिवर्तनस्य च संकल्पेन भारतं विश्वस्य द्रुततरा वर्धमाना अर्थव्यवस्थारूपेण जातम्।

### राष्ट्रपति-नारी-सशक्तिकरण

नारी-सशक्तिकरण विषये राष्ट्रपति: प्रोक्तवती यत: नारी-नेतृत्वे विकास: दरीदृश्यते। नारी-शक्ति-वन्दन-अधिनियमे लोकसभायां राज्य-सभायाम् च आरक्षणेन एतत्।

**पाकिस्तान-निर्वाचनम्**

अमरीकी-कांग्रेस-दलस्य निम्न सदनेन पाकिस्ताने जायमानस्य सामान्य-निर्वाचनस्य स्वतन्त्र-अन्वेषणस्य प्रस्ताव: स्वीकृता:। पाकिस्ताने लोकतन्त्राय मानवाधिकारं प्रति च समर्थानाय प्रदीयमाने प्रस्तावे चतुर्विंशत्याधिक-द्विसहस्रतं वर्षस्य सामान्य-निर्वाचने अनियमितताया: प्रकरणे स्वतन्त्रं, निष्पक्षं च निर्वाचनस्य महत्व-विषये बलं प्रदत्तम्। अत्रान्तरे प्रस्तावे विषये प्रतिक्रियां प्रकटयन् पाकिस्तानस्य रक्षामन्त्री अस्य आलोचनां कृतवान्। एष: प्रस्ताव: पञ्चाशिति: प्रतिशतं सदनस्य सदस्यानां सहयोगेन स्वीकृत:। अष्टनवति: प्रतिशतं सदस्यै: अस्य समर्थनेन मतदानं कृतम्। पाकिस्ताने अस्मिन् वर्षे फरवरी मासस्य अष्ट-दिनांके सामान्य-निर्वाचनम् कारितम्।

**ऋतु-विज्ञान-विभाग:**

ऋतु-विज्ञान-विभागेन अद्य जम्मू-कश्मीर:, लद्दाख:, गिलगित-बाल्टिस्तान:, मुजफ्फराबाद:, हिमाचलप्रदेश:, पंजाब:, हरियाणा, चंडीगढ:, पश्चिमी-राजस्थान: एतेषु राज्येषु मध्यमा-वृष्टया: पूर्वानुमानं कृतवान्। विभागस्य अनुसारेगण असम, मेघालय, अंडमान-निकोबार द्वीप-समूह, पश्चिम-बंगाल, सिक्किम, बिहार च राज्येषु अतिवृष्टय: संभावनां व्यक्ता। विभागेन प्रोक्तं यत् आगामि दिवसात् जूनमासस्य त्रिंशत् दिनांक पर्यन्तं झारखण्ड:, ओडिशा, उत्तराखण्ड:, पूर्वी-राजस्थान:, पूर्वी-पश्चिमी उत्तरप्रदेश:, हिमाचलप्रदेश:, हरियाणा, पंजाब च राज्येषु अवधानेन अतिवृष्टेय: सम्भावना अस्ति। दिल्ली-नगरे न्यूनतमं तापमानम् अष्टाविंशति: डिग्री-सेल्सियसपरिमितम् अधिकतमं तापमान: नवत्रिंशत् डिग्री सेल्सियसपरिमितं भवतुं शक्यते इति।

**राज्यसभा-शपथवचनं**

अद्य बिहार-झारखण्ड-मध्यप्रदेश राज्याणां नवनिर्वाचिता: षड् सांसदा: राज्यसभाया: सदस्यत्वेन शपथं गृहीतवन्त:। राज्यसभाया: अध्यक्ष: जगदीप-धनखड़े एतान् नवनिर्वाचितान् सांसद: शपथवचनं दापितवान्। कांग्रेसदलस्य सांसद: अखिलेश-प्रसाद-सिंह: झारखण्ड-मुक्ति-मोर्चा इत्यस्य नेता डॉ.सरफराज अहमद: भारतीय-जनता-पार्टीति-दलस्य नेता प्रदीप-कुमार-वर्मा, बंशीलाल गुर्जर, माया नारोलिया बालयोगी उमेशनाथ: च उच्चसदनस्य सदस्यरूपेण शपथं गृहीतवन्त:।

**महाराष्ट्र-विधानसभा**

महाराष्ट्र-राज्ये विधानसभाया: प्रावृट-सत्रस्य प्रथम-दिने विपक्षि दलेन ऋणक्षमा-प्राकृतिक-आपदाभि: प्रभावितानां कृषकाणां समस्यानां विषये विरोध-प्रदर्शनं कृत:। विधानसभायां विपक्षस्य नेता विजय-वडेट्टीवार: कांग्रेस-दलस्य नेता जगताप:, रवीन्द्र-धांगेकर:, अनिल-देशमुख: च अनेकेषु विषयेषु सर्वकारस्य आलोचनां कृतवन्त:।

**दिल्ली-आतिशी**

दिल्ल्या: जलमंत्रिणा आतिश्या: लोकनायक-जयप्रकाश-नारायण-अस्पताल इत्यत्र चिकित्सा प्रचलति। सा अद्य चिकित्सालयात् आनीता। अन्नत्यागस्य समये सोमवासरे तस्या: शर्करा-स्तर: अपचित:। अत: सा चिकित्सालये पंजीकारिता आसीत्।

**नीति-आयोग:**

नीति-आयोगस्य सदस्य: डॉ.वी.के.पॉल इत्यनेन अद्य नवदिल्ल्या स्वास्थ्य-परिवार-कल्याण-मन्त्रालस्य सचिव: अपूर्व-चन्द्रा इत्यस्य उपस्थितौ द्विदिवसीय कार्यशालाया: उद्घाटनं कृतवान्। कार्यशालाया: शीर्षकं 'भारते वन हेल्थ इत्यस्य गतिविधये विधि-पर्यावरण-आकलने राष्ट्रीय-परामर्श:' इति अस्ति। कार्यशालाया: मुख्य-उद्देश्यं अस्ति यत् वन हेल्थ इत्यस्य गतिविधिं प्रभावयितुं करणस्य उपलब्ध-विधिनां आकलनं सम्मिलित: अस्ति इति।

**लालकृष्ण आडवाणी**

भारतीय-जनता-पार्टीति दलस्य वरिष्ठ नेता लालकृष्ण-आडवाणी अखिल-भारतीय-आयुर्विज्ञान-संस्थाने गतरात्रौ स्वास्थ्य-विकृति कारणात् चिकित्सायां आसीत्। सम्प्रति तत: अवकाश : प्रदत्त:। भारतीय-आयुर्विज्ञान-संस्थानेन (एम्स) उक्तं यत वृद्धावस्थावशात् स्वास्थ्य-समस्या-समागता अस्ति। सम्प्रति सम्यक् निरीक्षणाधीनम् च स्वास्थ्यम् अस्ति।

**सीबीआई-नी□**

केन्द्रीय-अन्वेषण प्रभागेन द्वौ-परीक्षा-पत्र-स्रवस्य प्रकरणे द्वौ जनौ निगृहीतौ। वार्ताहरेण सूचितं यत् एतौ आरोपिणौ बिहारे पटनातत: निगृहीतौ।

**<u>क्रिके□</u>**

अन्ताराष्ट्रिय-क्रिकेट-परिषद:-आई.सी.सी.विश्व-चषक-क्रिकेट-प्रति-स्पर्धायां द्वितीय-उपान्त्यचक्रे भारतदलं इंग्लैण्ड-दलेन सह स्पर्धिष्यते। भारत-समयानुसारे अद्य सायं अष्टवादने एषा स्पर्धा समाराप्स्यते। इत: पूर्वं अस्याम् शृखलायां प्रथमे उपान्त्यचक्र अद्य प्रात: दक्षिण-अफ्रीका दलं अफगानिस्तान-दलं नव क्रीडकै: हानि-पुरस्सरं प्रथमं-वारं अन्तिमचक्रे प्रविष्टवत्।

**।। □ति वार्ता: ।।**